Sree Mallikarjuna Mangalasasanam Lyrics in Devanagari PDF

उमाकान्ताय कान्ताय कामितार्थ प्रदायिने

श्रीगिरीशाय देवाय मल्लिनाथाय मङ्गलम् ॥

सर्वमङ्गल रूपाय श्री नगेन्द्र निवासिने

गङ्गाधराय नाथाय श्रीगिरीशाय मङ्गलम् ॥

सत्यानन्द स्वरूपाय नित्यानन्द विधायने

स्तुत्याय श्रुतिगम्याय श्रीगिरीशाय मङ्गलम् ॥

मुक्तिप्रदाय मुख्याय भक्तानुग्रहकारिणे

सुन्दरेशाय सौम्याय श्रीगिरीशाय मङ्गलम् ॥

श्रीशैले शिखरेश्वरं गणपतिं श्री हटकेशं

पुनस्सारङ्गेश्वर बिन्दुतीर्थममलं घण्टार्क सिद्धेश्वरम् ।

गङ्गां श्री भ्रमराम्बिकां गिरिसुतामारामवीरेश्वरं

शङ्खञ्चक्र वराहतीर्थमनिशं श्रीशैलनाथं भजे ॥

हस्तेकुरङ्गं गिरिमध्यरङ्गं शृङ्गारिताङ्गं गिरिजानुषङ्गम्

मूर्देन्दुगङ्गं मदनाङ्ग भङ्गं श्रीशैललिङ्गं शिरसा नमामि ॥

Text Source vignanam.org
PDF file is generated [October 11, 2015] at Stotram Website